Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६८५-घ

Title सुगमार्थप्रबोधिकाख्यारघुवंश-(टीका

Author सुमतिविजयः

Extent ६ Age

Subject काव्यालंकारशास्त्रम् · अपूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ७८५-घ

(काव्यालंकार-शास्त्रम्) सुगमार्थप्रबोधिकाख्या रघुवंश टीका तृतीयसर्गः

नं० ७८५-घ

पत्राणि—६ (अपूर्णम्)

कर्त्ता सुमतिविजयः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥अथेति॥ अथानंतरं सुदक्षिणा राज्ञी दोहदलक्षणं दधौ बभार दोहदस्य लक्षणं मुखपांडुतादि किंविशिष्टं दोहदलक्षणं भर्तुः दिलीपस्य ईप्सितं वांछितं पुनः किं दोह
दलक्षणं उपस्थितोदयं उपस्थित उदयो यस्मिन् तत् उपस्थितोदयं पुनः किंभूतं दोहदलक्षणं सखीजनोद्वीक्षणकौमुदीमुखं सखीजनानां उद्वीक्षणे वि
लोकने कौमुदीव चंद्रज्योत्स्नेव सुखयतीति सखीजनोद्वीक्षणकौमुदीमुखं तत् सं० कश्चित् सखीजनोद्वीक्षणचंद्रिकामुखं इत्यपि पाठः तत्र चंद्रिकायाः
ज्योत्स्नायाः मुखं प्रारंभः पुनः किंभूतं दोहद० इक्ष्वाकुकुलस्य संततेर्निदानं मूलकारणमित्यर्थः ।१। ततइति। विशांपत्युः प्रियासुदक्षिणा दोहदं अपेदे किम्
तस्य विशांपत्युः अनन्यसंततेः न विद्यते अन्या संततिः संतानं यस्य सः अनन्यसंततिः तस्य अनन्यसंततेः दोहदं कमिव किंचित् उदयोन्मुखं मनोर
थं इव उदयाय उन्मुखं सन्मुखं पुनः किंभूतस्य विशांपत्युः अनन्यसौहार्दरसस्य अनन्यः सहृद्भावः सौहार्दस्य सुहृद्भावस्य रसो यस्य सः अनन्यसौहा
र्दरसस्तस्य अनन्यसौहार्दरसस्य किंभूता प्रिया प्रकृतिप्रियंवदा प्रकृत्या स्वभावेन प्रियं वदतीति प्रकृतिप्रियंवदा पाठांतरमिदं २ शरीरेति सासुद
क्षिणा मुखेन शशिना सर्वरीव अलक्ष्यत किंभूता सुदक्षिणा असमग्रभूषणा असमग्राणि अल्पानि भूषणानि यस्याः सा असमग्रभूषणा क
स्मात् शरीरसादात् शरीरस्य सादः खेदः शरीरसादः तस्मात् किंभूतेन मुखेन लोध्रपांडुना लोध्रो रक्तविशेषः तद्वत् पांडु लोध्रपांडु तेन लोध्र
पांडुना किंभूता शर्वरी विचेयतारका विचेया अल्पाः तारका यस्याः सा वि० पुनः किं० सर्वरी विभातकल्पा प्रभाततुल्या किं शशिना तनुप्रकाशेन तनुः
स्तोकः प्रकाशो यस्य सः तनुप्रकाशस्तेन तनुप्रका० ३ मुखेनेति सासुदक्षिणा मुखेन रात्रिं रजनीं विडंबयत् किं० मुखेन केतकपत्रपांडुना केतकपत्रवत्
पांडुः केतकपत्रपांडुस्तेन केतकपत्रपांडुना किंभूता सा कृशांगयष्टिः कृशा दुर्बला अंगयष्टिर्यस्याः सा कृशांगयष्टिः पुनः किं सा परिमेयभूषणा परिमेया
नि स्तोकानि भूषणानि यस्याः सा परिमेयभूषणा किंभूता रजनी स्थिताल्पतारा स्थिता अल्पा तारा यस्यां सा स्थिताल्पतारा स्थि० पुनः किं० रजनी कृ
शेंदुमंडला कृशं दीप्तिरहितं इंदोर्मंडलं यस्यां सा कृ० नां कृ० पुनः किंभूता रजनी विभातकल्पा प्रभातप्राया पाठांतरमिदं ४ तदाननेति नृपो दिलीपः
तदाननं आघ्राय न तृप्तिं आययौ तस्याः सुदक्षिणायाः आननं तदाननं समाघ्राय सुघ्रायित्वा न तृप्तिं मनस उल्लासं आप किंभूतं तदाननं सेवितमृत्ति
तिकालवं सेविता मृत्तिकालवा येन तत् तसे० पुनः किंभूतं तदाननं मृत्सुरभि सुगंधि जातः कः किमिव यथा करी हस्ती वनराजिपल्लवं वनराजौ पल्वलं अ
ल्पसरो जिघ्रन् तृप्तिं न प्राप्नोति किंभूतं वनराजिपल्वलं शुचिव्यपाये ग्रीष्मांते पयोमुचां मेघानां पृषतैर्बिंदुभिः सिक्तं ।५। दिवमिति त्रयोदशभिः पद्यैः [illegible]
तदर्थं ज्ञातव्यं अतः सा सुदक्षिणा प्रथमं तथाविधे अभिलाषे मनो न बबंध किं कृत्वा अपरसान् विविलंघ्य त्यक्त्वा अतः इति कुतः हि यतः मत्सुतः मदीयपुत्रः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र०टी०त० भुवं पृथिवीं भोक्ष्यते किंभूतः मत्सुतः दिगंतविश्रांतरथः दिशामंतेषु विश्रांतो रथो यस्य सः दिगंतविश्रांतरथः मत्सुतः क इव यथा मरुत्वान् दिवं स्वर्गं भुं
२ क्ते।दानमेति। उत्तरकोसलेश्वरो दिलीपः प्रियासखीः प्रियायाः सुदक्षिणायाः सख्यः प्रियासख्यः ताः क्रमतापन्नाः इति पृच्छति स्म किंभूतः अनुवेलं निरं
तरं आदृतः आदरवान् यः सख्यः प्रियासख्यः न इतीति किं मागधी केषु वस्तुषु स्पृहावती मे मम क्रिया लज्जा किंचित् ईप्सितं न संप्रति न कथयति ७
उपैति। सा सुदक्षिणा यद्वस्तु वक्त्रे याचितवती तत् आहृतं अपश्यत् किं कृत्वा दोहददुःखशीलतां उपेत्य प्राप्य दोहदेन दुःखं शीलयति अभ्यसतीति
दोहददुःखशीला तस्य भावो दोहददुःखशीलता तां दोहददुःखशीलतां हि यस्मात् कारणात् अस्याः सुदक्षिणायाः इष्टं वस्तु भूपते दिलीपस्य त्रिदिवे
पि त्रैलोक्येपि न अस्याध्यवर्तितेन अप्राप्यमस्ति किंभूतस्य भूपतेः अधिज्यधन्वनः अधिज्यं आरोपितं धनुर्यस्य सः अधिज्यधन्वा तस्य अधिज्यधन्वनः ।८
दिनेष्विति। दिनेषु गच्छत्सु तदीयं स्तनद्वयं पंकजकोशयोः श्रियं तिरश्चकार अधःकरोति स्म तस्याः इदं तदीयं किंभूतं स्तनद्वयं नितांतपीवरं नि
तांतं अतिशयेन पीवरं पुष्टं नितांतपीवरं पुनः किंभूतं स्त० आनीलमुखं आ ईषत् नीलं मुखं यस्य तत् आनीलमुखं किंभूतयोः पद्मकोशयोः भ्रमरैरव
लीढयोः भ्रमराणां आलीढौ व्याप्तौ भ्रमरावलीढौ तयोः भ्रमरावलीढयोः पुनः किंभूतयोः पद्मकोशयोः सुजातयोः सुष्ठु निष्पन्नयोः ९ क्रमे
णेति। सा सुदक्षिणा राजपत्नी शोभते स्म किं कृत्वा दोहदव्यथां क्रमेण निस्तीर्य दोहदस्य व्यथा दोहदव्यथा तां दोह० किं० सा प्रचीयमानावयवा
प्रचीयमानावयवा प्रचीयमानाः वृद्धिं प्राप्नुवंतो अवयवा यस्याः सा प्रचीय० का इव लता यथा लता शोभते किंभूता लता पुराणपत्रापगमात् संनद्धपल्ल
वा पुराणपत्राणां अपगमो नाशः पुराणपत्रापगमस्तस्मात् पुराण० अनंतरं संनद्धमनोज्ञपल्लवा संनद्धाः संवृद्धाः मनोज्ञाः सुंदराः
पल्लवाः यस्याः सा संनद्धमनोज्ञपल्लवा १० निधानेति नृपो दिलीपः महिषीं पट्टराज्ञीं सुदक्षिणां ससत्त्वां सह सत्त्वेन गर्भेण वर्तते या
सा ससत्त्वा तां ससत्त्वां सगर्भां अमन्यत स्म का इव सागरांबरां पृथिवीं निधानगर्भां इव निधानसहितां इव शमीं अभ्यंतरलीनपावकां
अभ्यंतरे मध्यभागे लीनः पावको यस्याः सा अभ्यंतरलीनपावका तां अभ्यं० पुनः कामिव सरस्वतीं नदीमिव किंभूतां सरस्वतीं अं
तःसलिलां अंतर्मध्ये सलिलं पानीयं यस्याः सा तां अंतः० सरस्वती नदी हि म्लेच्छदेशे भुवं अंतर्धाय गुप्तरूपवती स्थिता ११ प्रियेति
स दिलीपः धीरः यथाक्रमं पुंसवनादिकाः क्रियाः आधरणीः मुख्याः व्यधत्त चकार किंभूताः पुंसवनादिकाः क्रियाः प्रियानु रघु:
२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ततश्च श्रीगर्भं किंविशिष्टाय जनाय शुद्धांतचराय अंतःपुरस्थाय किंकुर्वते जनाय कुमारजन्म शंसते कथयते वर्णानि कांददते किंविशिष्टं कुमारजन्म अमृतसम्मिताक्षरं
अमृतेन संमिता नितुल्यानि अक्षराणि यस्य तत् अमृतसम्मिताक्षरम् ।१८। समीक्ष्येति । पिता दिलीपः आत्मनः स्वकीयस्य मुदा हर्षेण शरीरेण प्रबभूव न ममौ इत्यर्थः ॥ किं
विशिष्टेन प्रहर्षेण गुरुः गरिष्ठः किंकुर्वतः सुताननं सुतस्य आननं सुताननं तस्मिन् सुतानने किंकृत्वा पुत्रस्य चिरान्मुखं समीक्ष्य दृष्ट्वा कः किमिव इव यथा दुर्गतो दरि
द्रो युवा निधानकुंभस्य मुखं दृष्ट्वा हर्षेण न माति अथवा यथा पयोधिः समुद्रः इंदूदयमूर्छितो भवति इंदोश्चंद्रस्य उदयः इंदूदयः तेन मूर्छितः इदं पाठांतरं ।१९।
निवातेति । तपस्य दिलीपस्य आत्मनि हर्षः न प्रबभूव न ममौ इत्यर्थः किंविशिष्टः प्रहर्षः गुरुः गरिष्टः किंकुर्वतः सुताननं सुतस्य आननं सुताननं पुत्रमुखं पिबतः अत्यालोकनपा
नमितुल्यत्वात् अतएव तत् पश्यतः केन चक्षुषा किंविशिष्टेन चक्षुषा निवातपद्मस्तिमितेन वातस्य अभावो अदर्शनात् महोदधेः समुद्रस्य पूरः प्रवलो भवति न समुद्रमध्ये
माति ।२०। स जातेति । स दिलीपस्य सूनुः बभौ शुशुभे क इव मणिरिव किंविशिष्टः मणिः आकरोद्भवः आकरात् उद्भवो जातः आकरोद्भवः पुनः किंविशिष्टः मणिः
प्रयुक्तसंस्कारः प्रयुक्तः संस्कारो यस्य सः प्रयुक्तसंस्कारः क्व सति पुरोधसा विशिष्टेन तपोवनात् एत्य आगत्य अखिले समस्ते जातकर्मणि कृते सति किंविशि
ष्टेन पुरोधसा तपस्विना ।२१। सुखश्रवेति । वारयोषितां वेश्यानां मंगलतूर्यनिःस्वनाः मंगलार्थं वाद्यत्राणि प्रमोदनृत्यैः सह न केवलं मागधीपतेर्दिलीप
स्य सद्मनि गृहे व्यजृंभंत । अपितु दिवौकसां देवानां पथि आकाशे पि व्यजृंभंत किंविशिष्टाः मंगलतूर्यनिःस्वनाः सुखश्रवाः सुखयंतीति सुखाः सुखाः श्र
वाः कर्णाः श्रुतयो येषां ते सुखश्रवाः ।२२। न संयत इति । तस्य रक्षितुः राज्ञः सः संयतो बद्धो न बभूव यं प्रति राजा विसर्जयेत् किंविशिष्टः राजा सुतजन्महर्षि
तः सुतस्य जन्म सुतजन्म तेन हर्षितः सुतजन्महर्षितः तदा तस्मिन् काले केवलं पितॄणां ऋणाभिधानात् स्वयमेव मुमुचे ।२३। श्रुतस्येति । पार्थिवो दिली
पः आत्मसंभवं पुत्रं नाम्ना रघुं चकार किंविशिष्टः पार्थिवः अर्थवित् अर्थं वेत्तीति अर्थवित् किं लघु इति धातोर्गमनार्थं अवेक्ष्य रघि लघि इत्यादि पठि
तस्य रघि धातोर्गमनार्थत्वं अवेक्ष्य ज्ञात्वा इति किं अयं अर्भकः बालः श्रुतस्य ग्रंथस्य पारं यायात् तथा रणे परेषां अरीणां युधि संग्रामे अंतं पारं यायात् ।२४।
पितुरिति । स बालः दिने दिने वृद्धिं पुपोष कैः कलाभिः अंगैः प्रधानैः शरीरावयवैः कस्मात् पितुर्दिलीपस्य प्रयत्नात् पालनात् किंभूतस्य पितुः समग्रसंपदः समग्राः संप
र्णाः संपदो यस्य सस्तस्य स रघुः यथा बालचंद्रमा हरिदश्वदीधितेः सूर्यस्य किरणस्य अनुप्रवेशात् कलाभिः उपचितः प्रतिदिनं वर्धयति तथा रघुरपीत्यर्थः ।२५।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रागस्य प्रियाः संवर्धितप्रीतेः १ मनः सकलत्रैः २ भुजार्जितानां दिगंतसंस्थां संपदं च पुनः धृतेः सदृशी तुल्याः उत्त
रुत्तरादृशीः उत्कटाः क्रियाः आरंभे १२ सुरेंद्रेति नृपो दिलीपः तया सुदक्षिणया अनंदत् किं विशिष्टः
आगतः किंविशिष्टया तया प्रयत्नमुक्तासनया प्रयत्नेन मुक्तं आसनं यया सा प्रयत्नमुक्तासना तया प्रय
त्नमुक्तासनया कस्मात् सुरेंद्रमात्राश्रितगर्भगौरवात् लोकपालानां मात्राभिः अंशैः आश्रितस्य ग
र्भस्य गौरवात् गुरुत्वतः अष्टाभिर्लोकेशानां निर्मितो नृपः इति मनुः पुनः किंविशिष्टया तया उपचारांज
३ लिखिन्नहस्तया उपचारो विनयस्तस्यार्थं अंजलिस्तद्विधे खिन्नो हस्तो यस्याः सा उप० तया पुनः किंभू० तया पारिप्लवनेत्रया पारिप्लवे चंचले
नेत्रे यस्याः सा पारिप्लवनेत्रा तया ७२ कुमारेति अथ पतिर्दिलीपः प्रियां प्रसवोन्मुखीं ददर्श प्रसवाय प्रसूतये उन्मुखी प्रसवोन्मुखी तां प्रसवोन्मुखीं
कां कां इव श्रीं इव काले मेघागमे दिवं आकाशं अभ्रैः इव आच्छन्नां जातां निगूढितां ७३ कुसलिलगर्भ ... वैद्यैः अधिष्ठिते सति किं
भू० भिषग्भिः कुमारभृत्याकुशलैः बालचिकित्साविशारदैः पुनः किं भिषग्भिः आप्तैः हितैः ७४ ग्रहैरिति ततस्तदनंतरं सुदक्षिणा समये काले सुतं पु
त्रं अजनयत् किंभू० सुदक्षिणा शचीसमा इंद्राणीतुल्या का कं इव त्रिसाधना शक्तिः अक्षयं अर्थं इव त्रीणि साधनानि प्रभुत्वोत्साहमंत्ररूपा
णि यस्याः सा त्रिसाधना किं सुतं पंचभिः ग्रहैः सूचितभाग्यसंपदं सूचिता भाग्यस्य संपत् यस्य स सः सूचितभाग्यसंपत् तं सू० किंभूतैः ग्रहैः उच्चसंश्रयैः र
वेर्मेषतुले प्रोक्ते इत्यादिना प्रकारेण स्वकीयोच्चराशिस्थितैः पुनः किंभूतैः ग्रहैः असूर्यगैः यस्मिन् राशौ सूर्यः तत्र न गतैः यतः सूर्यराशिगताः सर्वे ग्रहाः
अस्ताः भवंति अतः अनस्तैरित्यर्थः ७५ दिशः इति पुत्रे जाते किं जातं तदाह दिशः सर्वा दिशः प्रसेदुः निर्मला जाताः पुनः मरुतो वायवो ववुः वांति स्म किं० मरु
तः सुखाः सुखस्पर्शाः पुनः अग्निः प्रदक्षिणार्चिः सन् हुतं आज्यादिकं आददे प्रदक्षिणा वर्तिता अर्चिषः शिखा यस्य सः प्रद० ततः सर्वं शुभसंसूचि बभूव हि
यतः तादृशां उत्तमपुरुषाणां भवो जन्म लोकाभ्युदयाय भवति लोकस्य अभ्युदयो लोकाभ्युदयः तस्मै लोकाभ्युदयाय ७६ अरिष्टेति तस्य निजेन तेजसा स्व
कीयेन निशीथदीपाः अर्धरात्रिदीपाः सहसा हतत्विषो बभूवुः जाताः हता त्विट् कांतिर्येषां ते हतत्विषः इवोत्प्रेक्षते आलेख्यसमर्पिता इव चित्रन्यस्ता इव किं
तेजसा अरिष्टशय्यां सूतिकागृहं परितो विसारिणा विस्तारिणा ... न परितो भोगे द्वितीया किं तस्य सुजन्मनः सुष्ठु जन्म यस्य सः सुजन्मा तस्य सु० ७७ जना
येति भूपतेर्दिलीपस्य ... एवं वस्तु जनाय अदेयं आसीत् त्रयमेव किं तत् छत्रं एकं च द्वितीयं उभे चामरे २ किंभू० छत्रं शशिप्रभं शशिवत् चंद्रवत् प्रभा यस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रणिपातशिक्षया शिशुः रघुर्नम्रोऽभूत् दिलीपस्याग्रे ततः नमस्कारेण पितुर्मनः प्रसन्नं जातमिति प्रणिपातस्य
शिक्षा प्रणिपातशिक्षा तया प्रणिपातशिक्षया धात्री स्यादुपमातेति हैमकोशः ।। ९ ।। तमंकेति ।। नृपः दिलीपः चिरात्प्रभू-
स्प ३ तकालात् सुतस्पर्शरसज्ञतां ययौ यो चिरात् पुत्रस्पर्शसौख्यभाग् जातः किं कृत्वा पुत्रं रघुं अंके उत्संगे आरोप्य ।।
गृहीत्वा किंभूतः दिलीपः उपांतसंमीलितलोचनः उपांते नेत्रप्रांते संमीलिते लोचने येन स उपांतसंमीलित
लोचनः प्राप्तमुद्रितनेत्रः इत्यर्थः तं सुतं किं कुर्वंतमिव शरीरयोगजैः सुखैः त्वचि पिबंतं त्वचि दिलीपचर्मणि अमृ-
तं सुधां निषिंचंतमिव ।। वर्षंतमिव शरीरस्य रघुः शरीरयोगः शरीरयोगः तस्मात् जातैः शरीरयोगजैः पुत्रालिंग-
नात्समुत्थितैः सुखैरित्यर्थः ।। अममिति ।। २० ।। दिलीपः अनेन सुतेन अन्वये वंशे स्थितिं मेने स्थैर्ययुक्तां अमंस्त अ-
ज्ञासीत् ।। किंभूतः दिलीपः स्थितेः अभेत्ता मर्यादारक्षकः स्वकीयाचारपालकः इत्यर्थः किंभूतेन सुतेन परार्द्ध्यज-
न्मना परार्द्ध्यं श्रेष्ठं जन्म यस्य सः परार्द्ध्यजन्मा तेन परार्द्ध्यजन्मना पुनः कथंभूतेन अनेन गुणानुवर्त्तिनाऽप्यनेन
स्वमूर्त्तिभेदेन स्वस्यात्मनो मूर्त्तिभेदः ।। स्वमूर्त्तिभेदस्तेन स्वमूर्त्तिभेदेन ननु गुणेन अतः स्थितिमंतं नृपः जानाति
स्म कमिव प्रजानां पतिः ब्रह्मा आत्मनः स्वस्य सर्गमिव सृष्टिमिव यथा ब्रह्मा आत्मनः सर्गं स्थितिमंतं जानाति तद्वत्प्र-
जापि सुतेन स्थितिमंतं मेने ।। स इति ।। २१ ।। स रघुर्वाङ्मयं शास्त्रं समाविशत् अविवेश केन लिपेः यथावद्ग्रहणेन ते-
लिपेः २ न अकारादिहकारांताक्षराणां यथावद्ग्रहणेन सम्यग्ज्ञानेन नदीकेन कमिव नदीमुखेन समुद्रमिव यथा क-
श्चिन्नदीमुखेन समुद्रं सागरं प्रविशति तद्वत् रघुरपि किंभूतः बालः वृत्तचूडः वृत्तं वर्तुलाकारं चूडाव-

गुणानामथे
अग्रेश्रेष्ठस्ते
र्त्तितें शीलं यस
तद्गुणाग्रवर्त्ति
तेन गुणाग्रवर्त्ति
ना पुनः कथंभू
तेनानेन ५८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥उमा इति २६ तथा तेन प्रकारेण नृपो दिलीपः च पुनः सा सुदक्षिणा मागधी मगधदेशोद्भवा तेन रघुणा सु-
तेन ननंदतुः हर्षयामासतुः तथेति किं यथा उमावृषांकौ पार्वतीमहादेवौ शरजन्मना कार्त्तिकेयेन ननंदतुः
पुनः शचीपुरंदरौ शचीइंद्रौ यथा जयंतेन जयंतपुत्रेण ननंदतुः तथा सुदक्षिणादिलीपौ प्रीतिभावः कीदृ-
शौ राज्ञीदिलीपौ तत्समौ सा सुदक्षिणा गौरीशचीसमा राजा रुद्रेण तु पुनः शक्रेण तुल्यः किंभूतेन सुतेन तत्स-
दृशेन तयोः कार्त्तिकेयजयंतयोः सदृशः तत्सदृशस्तेन रथांग इति २७ तयोः सुदक्षिणादिलीपयोः यत्प्रे-
म पुरा परस्पराश्रयं अन्योन्यनेव प्रभवजातं तत्प्रेम एकसुतेन रघुणा विभक्तमपि विभागीकृतमपि तथापि परस्प-
रोपरि अन्योन्योपरि वर्धे न व्यहीयत न हीनं जातमित्यर्थः कथंभूतं प्रेम भावबंधनं भावः चित्तं बध्यते येन तत्
भावबंधनं तयोः कयोरिव रथांगनाम्नोरिव चक्रवाकीचक्रवाकयोरिव चक्रवाकीचक्रवाकयोर्यथा हि प्रे-
म भवति तादृक् तयो राज्ञीनृपयोः प्रीतिभावः रथस्य अंगं चक्रं नाम ययोस्तौ रथांगनामानौ तयोः रथांगना-
म्नोः रथांगं चक्रको कयोरित्यनेकार्थ इति [illegible] लके उवाचेति २८ स च प्रथमकः बालः रघुनामा तेन सर्वेण
कर्मणा पिपितुर्दिलीपस्य मुदं हर्षं ततान विस्तारयामास तेनेति केन आह धात्र्या उपमात्रा प्रथमोदितं पुरा-
दितं वचः रघुः स ततः पितुरंतिके उवाच कथयामास इति रघुकथनेन पितुर्मनः हर्षमज्जातं च पुनः तदीयां धा-
॰य॰२ त्रीसंबंधिनीं अंगुलीं अवलंब्य त्वा दिलीपसमीपं ययौ गतः ततः गमनेनापि हर्षमजातं मनः पितुरिति॥ च पुनः ते

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स सह वृत्तचूडः पुनः किंभूतः रघुः अमात्यपुत्रैः मंत्रिपुत्रैः अन्वितः सहितः संयुतः किंभूतैः अमात्यपुत्रैः सवयोभिः समानं सदृ
शं वयोऽवस्था येषां ते सवयसः तैः सवयोभिः पुनः किंभूतैः चलकाकपक्षकैः चलाः अंगचंचलाः काकपक्षाः येषां ते च
लकाकपक्षकास्तैः सुखं प्रारंभसूल्पयोः वदनोपाययोरग्रे मूले निःसरणेपि चेत्तनेकार्थतिलकः ॥ अथोपेति ॥ ३२ ॥
अथ अथानंतरं गुरवः एनं रघुं विधिवत् वेदोक्तप्रकारेण विनिन्युः अध्यापयामासुः पाठितवंतः किंभूताः गुरवः वि
पश्चितः पंडिताः किंभूतं रघुं उपनीतं दत्तयज्ञोपवीतं पुनः किंभूतं गुरुप्रियं गुरोः प्रियं गुरुप्रियं तत्र तस्मिन्नर्भके बा
लरूपे रघौ अवंध्ययत्नाः बभूवुः सफलयत्ना जाताः अवंध्यः सफलो यत्नो येषां ते अघातृगुरुसमिर्यत्नाविर्तं ॥ तत्स
मागतं अर्भं स्तामितिभावः हि यतः क्रिया शिक्षा वस्तुनि वस्तुविषये उपहिता युक्ता प्रसीदति सफला जायते ॥ क्रिया
रुनिः कृता चर्चा कर्मणोः संप्रधारणे आरंभोपायचेष्टासु कृतौ शिक्षाचिकित्सयोरिति अनेकार्थतिलके धिय
इति ३३ स रघुः धियः बुद्धेः सकाशात् क्रमात् अनुक्रमतः चतस्रः विद्याः ततार पारं ययौ किंभूताः विद्याः चतुर
र्णवोपमाः चतुर्णां अर्णवानां समुद्राणां उपमा यासां ताः किंभूतः रघुः उदारधीः उदारा विस्तीर्णा धीर्बुद्धिर्यस्य सः
कैः समग्रैर्गुणैः समस्तैर्गुणैः कैः क इव पवनेऽतिपतंति अतिक्रमंती तैः वेगशीलास्तैः हरिद्भिः अश्वैः हरितां दिशां ईश्वरः
इंद्रः दिशः इव लचमिति ३४ तद्गुरुः दिलीपः एकपार्थिवः एक एव नृपः क्षितौ भूमौ केवलं न अभूत् किंतु पितुः स
मीपे सोऽपि रघुरपि एकधनुर्धरः अभूत् शूरवीरो जातः धनुर्धरत्वात् किंभूतो रघुः मंत्रवित्पर्यालोचनज्ञः पुनः किं
भूतः अशिक्षितास्त्रः अशिक्षितानि अस्त्राणि येन सः किं कृत्वा रौरवीं मृगत्वचं परिधाय किंभूतां त्वचं समेध्यां प
वित्रयुक्तां एकोऽत्र मुख्यवाचकः ॥ महोक्षेति ॥ ३५ ॥ स रघुः क्रमात् क्रमेण वपुः शरीरं पुपोष वृद्धिं प्रापत् किंभूतो र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घुः यौवनभिन्नशैशवः यौवनेन भिन्नं भेदितं [illegible] शैशवं यस्य सः कथंभूतेव पुः गांभीर्यमनोहरं गांभीर्येण
गंभीरतागुणेन मनोहरं रमणीयं रघुः क इव वत्सतर इव अत्र तं तं लघुः वत्स इव यथा लघुवत्सः महोक्षतां धुरंधरतां स
शान्तरमणीये शरीरं वहति तद्वद्रघुरपि पुनः क इव कलभ इव यथा शैशवं कलभः गजेश्वरस्य यथा कलभः गजशावकः गजेन्द्र
त्वमाश्रयन्नाश्रयन् सुंदरं शरीरं पुष्णाति तद्वद्रघुरपीति भावः अथेति ॥ २६ ॥ अथ अथानंतरं अस्य रघोर्गुरुर्दिलीपः गो
दान विधेरनंतरं ब्रह्मचर्यव्रतानंतरं विवाहदीक्षां निवर्त्तयन् चकार च पुनः ततः नरेंद्रकन्याः तं रघुं सततिभर्त्तारं प्रा
प्य वसुः शोभया मानुः का इव दक्षसुताः रोहिण्यादय इव यथा दक्षसुताः रोहिणीप्रमुखाः तमोपहं चंद्रं प्राप्य शोभि
ते स्म तथा ताः कन्याः अपीत्यर्थः अग्नीध्रौ कौस्तमोपहारस्य मरः युवा इत्ति रघुः गुरुं दिलीपं अजयत् जितवान् कस्मात्
वपुः प्रकर्षात् वपुषः देहस्याधिक्यात् किंभूतः रघुः युवा पुनः किंभूतः युगव्यायतबाहुः युगवत् व्यायतौ विस्तीर्णौ
बाहू यस्य सः किंभूतः रघुः अंशलः मनोज्ञस्कंधः कपाटवक्षाः कपाटवत् विशालं विस्तीर्णं वक्षो हृदयं यस्य सः
कपाटवक्षाः पुनः किंभूतः रघुः परिणद्धकंधरः परिणद्धा महती कंधरा यस्य सः तथापि रघुः नीचैः अस्य तथ्य व
लोक्यत कस्मात् विनयात् विनययुक्तत्वात् नतं नत इति ॥ २० ॥ ततः पश्चात् नृपेण दिलीपेन राज्ञा असौ रघुः युवराज
शब्दभाक् चक्रे यौवराज्ये स्थापितः इतीति किंनिसर्गसर्गसंस्कारविनीतः स्वभावेन चित्तकर्मणा विनीतः नम्रीभूतः
किंभूते न नृपेण प्रजानां लोकानां धुरं भारं लंघयिष्णुता लघुं करिष्णुता किंभूतां धुरं नितांतगुर्वीं अतिशयेन गरिष्ठां
पुनः किंभूतां धुरं चिरं चिरकालं यावत् स्थाप्य मनासवयं धृतां गृहीतां युवा चासौ राजा च युवराजः तस्य यः शब्दः तं भज
ते इति युवराजशब्दभाक् संस्कारः प्रतियत्नेन भवेन्मानसकर्म गुणभेदे यत्ने कार्ये ॥ नरेंद्रेति ॥ ३२ ॥ श्री

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

राजलक्ष्मीः तदास्पदं रघोः स्थानं केऽग्रगच्छत् संश्रापयामास केनांशेन भागेन कस्मात् नरेंद्रमूलाय तनादन्नेन
रंनरेंद्रो दिलीपः स एवं मूलं प्रधानं यत् ग्रायतनं स्थानं तस्मात् तदनंतरं पश्चात् कथं भूतं रघुं युवराजसंज्ञितं
युवराजाख्यं किंभूता श्रीः गुणाभिलाषिणी गुणान् अभिलषितुं शीलं यस्याः सा गुणलोलुका इत्यर्थः कस्मात् किमि
व कमलात् पुरातनकमलात् उत्पलमिव नवोत्पलमिव किंभूतं कमलं नवावतारं नूतनोत्पन्नमित्यर्थः
यथा जीर्णकमलात् श्रीः शोभा नवीनं कमलं याति तद्वद् दिलीपश्रीः अपरित्यज्य रघुं याता इत्यर्थः विभावसु
र्ति॥४०॥ पार्थिवो दिलीपस्तेन रघुसुतेन नितरां अतिशयेन सुदुःसहः सोढुमशक्यो बभूव भूतः केन क इव
वायुना पवनेन विभावसुः अग्निरिव किंभूतेन वायुना सारथिना सारथितुल्येनेत्यर्थः पुनः केन क इव कटमे
देन गंडस्थलमदस्रवत्तरलेन करीव गजं इव पुनः केन क इव घनव्यपायेन मेघात्यये नगभस्तिमान् सूर्य इव
यथा वातेनाग्निः सोढुमशक्यः पुनर्गजः मदेन सोढुमशक्यः तथा दिलीपः रघुणा वैरिणां सोढुमशक्यो जातः
नियुज्येति ४१ स राजा दिलीपः अपविघ्नं विघ्नरहितं क्रतूनां यज्ञानां शतं ग्राप प्राप्नोत् किंभूतं क्रतूनां शतं एकेन
एकयज्ञेनाऽऽ ऊनं किं कृत्वा तं रघुं नियुज्य स्थापयित्वा क होमतुरंगरक्षणे होमस्य तुरंगः होमतुरंगस्तस्य
रक्षणं होमतुरंगरक्षणं तस्मिन् किंभूतं रघुं धनुर्धरं धनुर्धरतीति धनुर्धरस्तं पुनः किंभूतं राजसुतैः राजकु
मारैः अनुद्रुतं अनुगतं सेवितमित्यर्थः किंभूतो दिलीपः शतक्रतूपमः शतक्रतोः इंद्रस्य उपमा यस्य सः इंद्रतु
ल्य इत्यर्थः अत इति ४२ किल निश्चयेन अतः परं नवनवतियज्ञोत्पः पश्चात् शक्रः इंद्रः तुरंगं यज्ञजं हारं अपहृत =तो४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वान् कस्मात् रक्षितारं रक्षां कुर्वंतं धनुर्भृतां धनुर्धराणां अग्रतः एव किंभूतं तुरंगं ते स्नयज्वना यज्ञकारेण रा
ज्ञा मखाय यज्ञाय उत्सृष्टं रक्षितं पुनः किंभूतं तं अग्रे स्वैरं अनर्गलं स्वेच्छया चरंतं किंभूतः शक्रः गूढविग्रहः गू
6 ढकायः इंद्रियायतनमंगं विग्रहो इतिहेमकोषः विषादेति ४३ यत्र चकारो हेतु तुल्यकालं सूचयतः यथा द
र्शयति यस्मिन् समये कुमारसैन्यं सपदि तत्काले विस्मितं निश्चलं स्थितं जातं तत्र अथ तस्मिन्समये एव नंदिनी
वसिष्टधेनुः ददर्श दृष्टा कुमारसैन्येनेति शेषः कथंभूता नंदिनी यदृच्छया स्वेच्छया आगता समागता क
थंभूते कुमारसैन्ये विषादलुप्तप्रतिपत्ति विषादेन दुःखेन लुप्ता गता प्रतिपत्तिर्ज्ञानं यस्य तत् पुनः किंभूता नं
दिनी श्लाघ्यप्रभावा श्लाघ्यः आकर्णितः प्रसिद्धः प्रभावो माहात्म्यं यस्याः सा अथ मंगलिप्रख्याने तरं कार्त्स्न्येन पुमा
रंभेऽस्यनेकार्थे तिलकः तदंगेति ४४ दिलीपनंदनो रघुः अतींद्रियेष्वपि इंद्रियागोचरेष्वपि भावेषु पदार्थे
षु उपपन्नदर्शनो प्राप्तावलोकनो बभूव जातः किं कृत्वा तदंगनिष्यंदजलेन धेनोरंगात् स्विन्नजलेन लोचने
नेत्रे प्रमृज्य प्रक्षाल्य कथंभूतेन जलेन पुन्येन पवित्रेण किंभूतो रघुः सतां सज्जनानां मध्ये पुरस्कृतः अग्रे
सरः इति तस्या धेनोरंगं तदंगः तदंगात् निष्यंदजलं तदंगनिष्यंदजलं तेन सहस्वेति ४५ स रघुः श्वेतः श्व
सो दिशि दिवं इंद्रं ददर्श अवलोकयामास किंभूतं तं देवं पर्वतपक्षशातिनं पर्वतानां गिरीणां पक्षान् शातयति
छेदयतीति पर्वतपक्षशातनः तं गिरिपक्षच्छेदकमित्यर्थः किंभूतो रघुः नरदेवसंभवः नरदेवात् दिलीपात् संभवः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

उत्पतितिर्यस्य सः दिलीपात्मजात इत्यर्थः किंभूतं देवेंद्रं अश्वहरं तं किंभूतमश्वं पुनःपुनः सूतनिषिद्धचापलं पु
नःपुनः वारंवारं सूतेन सारथिना निषिद्धं दूरीकृतं चापलं चांचल्यं यस्य सः तं पुनः किंभूतमश्वं रथरश्मिसंयुतं
रथरश्मिभिः संयुतं रथरश्मिसंयुतं शतैरिति ४६ रघुः एनं इंद्रं अवोचत कथयामास किं कृत्वा हरिं इंद्रं वि
दित्वा ज्ञात्वा कैः अक्ष्णां नेत्राणां शतैः किंभूतैः नेत्रशतैः अनिमेषवृत्तिभिः अनिमेषा निमेषरहिता वृत्तिर्ये
षां ते अनिमेषवृत्तयः तैः पुनः कैः वाजिभिः अश्वैः किंभूतैरश्वैः हरिभिः पीतवर्णैः रघुः किं कुर्वन्निव धीरेण स्व
रेण गगनस्पृशा आकाशव्यापिना इत्यर्थः इव शब्दः अवधारणार्थः मखांशेति ४७ भो देवेंद्र मखांशभाजां देवा
नां मध्ये मनीषिभिः पंडितैः प्रथमः आदिमः त्वमेव निगद्यते कथ्यसे मखांशं यज्ञभागं भजंते ते मखांशभाजः तेषां त्वं
मद्गुरोर्मम पितुर्दिलीपस्य क्रियामभिघाताय तत्क्रियाविनाशाय कथं प्रवर्त्तसे कथं प्रवृत्तो भवसि किंभूतस्य मद्गु
रोः अजस्रं सदा यज्ञदीक्षायां प्रयतः सावधानः तस्य अग्रादौ प्रधाने प्रथमे इति शाश्वतः त्रिलोकेति ४८ भो इंद्र
त्वया मखविद्विषः दैत्याः ननु निश्चयेन नियम्याः वध्याः किंभूतेन त्वया त्रिलोकनाथेन त्रयाणां लोकानां नाथस्त्रिलो
कनाथस्तेन पुनः कथंभूतेन दिव्यचक्षुषा दिव्यं चक्षुर्यस्य सः दिव्यचक्षुस्तेन सर्वज्ञेनेत्यर्थः चेद्यदि सत्वं इंद्र ए
वं स्वयमात्मना सतां जनानां कर्मसु कार्येषु अंतरायी विघ्नकारको भवसि तदा ऽयं विधिः यज्ञादेः च्युतः नष्टः गतः
किंभूतानां सतां धर्मचारिणां धर्मं चरंतीति धर्मचारिणः तेषां धर्मकार्यकर्तॄणामित्यर्थः तदंगेति ४९ भो मघवन् सो
ऽहं मखस्य क्रतोर्महायज्ञस्य अंगं तुरंगं प्रतिमोक्तुं त्यक्तुं अर्हसि योग्यो भवसि किंभूतं अंगं तदंगं तस्य महायज्ञस्य अंगं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

7

उपकारकं पुनः किंभूतं अगम्यं अश्रेयं भो इंद्र ईश्वराः भवादृशाः मलीमसां मलिनां पद्धतिं अध्वानं मलिनाचारं न आददते
न गृह्णंतीति किंभूता ईश्वराः शुचेः पथः सन्मार्गस्य दर्शयितारः प्रदर्शकाः इति शेषः ५१ दिवौकसां देवानां अधिपतिः इं
द्रः इत्थं निवर्तयामास दिवि ओको गृहं येषां ते दिवौकसः तेषां किं कृत्वा मतिसर्वोत्कर्षे रघुणा समीरितं वचः वचनं निशम्य
श्रुत्वा किंभूतं वचः प्रगल्भं प्रौढं किंभूतः इंद्रः सविस्मयः साश्चर्यः च पुनः इंद्रो पि उत्तरं प्रतिवाक्यं प्रचक्रमे कथयितु
मारेभे इत्यर्थः यथात्येति ५२ भो राजन्य कुमार यत् त्वं आत्थ वदसि मा तत् यथा सत्यं तु पुनः १ रतः अस्मात् त्वं कार्यं यशः
रक्ष्यं रक्षणीयं कैः यशोधनैः यश एव धनं येषां ते यशोधनास्तैः यशस्विभिरित्यर्थः किंभूतं यशः जगत्प्रकाशं जगति
विश्वे प्रकाशः प्रख्यातः जगत्प्रकाशं तत् भो रघो तत् अशेषं समस्तं मम यशः सांप्रतं भवद्गुरुः दिलीपः लंघयितुं अतिक्रमि
तुं उद्यतः उत्थितः कया इज्यया यज्ञेन भवतः तव गुरुः भवद्गुरुः हरिः इति ५३ भो कुमार तथा तेन प्रकारेण पुनः यः मां इंद्रं
शतक्रतुं विदुः जानंति स्म शतं क्रतवो यागाः यस्य स शतक्रतुः तं भो रघो नः अस्माकं एषः शतक्रतुशब्दः द्वितीयगामी न
हि द्वितीयं न जातीत्यर्थः तथेति किं यथा पुरुषे पुरुजने पुण्यकः अद्वयः हरिः हरिः स्मृतः कथितः पुनः यथा त्र्यंबकः महेश्व
रः इंद्र देव एव एकता एकत्वं एकस्मिन्नेव अपरः अन्यो न तथा शतक्रतुः अहमेव नान्यः इति पुरुषे पुरुषोत्तमः पुरुषोत्तमः
त्रीणि अंबकानि लोचनानि यस्य सः त्र्यंबकः उच्यते इति ५४ भो रघो अतः अस्मात् कारणात् त्वदीयस्य पितुः दिलीपस्य
अयं अश्वः तुरंगमः मया इंद्रेण अपहारितः गृहीतः किंभूतेन मया कपिलानुकारिणा कपिलं कपिलाख्यं मुनिं अनु
कर्तुं शीलमस्येति कपिलानुकारी तेन क्रोधेन कपिलसदृशो भो मि इत्यर्थः भो रघो अत्र तव प्रयत्नेन अलं ममस

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सरघुः ऊर्द्ध्वमुखः अतिष्ठत् स्थितः किं कृत्वा एवं शस्त्रं गृहाण इति पूर्वोक्तं वचः मघवंतं इंद्रं उक्त्वा कथयित्वा किंभूतो रघुः ५६

मीपातुरंगमोचयितुं इति प्रयत्नेन अप्रबल्नमित्यर्थः सगरस्य संततेः पदव्यां सगरस्य राज्ञः पुत्रस्य मार्गे पदे स्थाने मा कृ
थाः माकार्षीः सगरसुतवत्त्वमपि भस्मनः स्थानं मा भव यथा सगरपुत्राः कपिलेन भस्मीकृताः तद्वत्त्वामपि करि
ष्यामीति भावः ततइति ५५ पुनः इंद्रोक्तानंतरं अभयः निर्भयः सन् रघुः पुरंदरं इंद्रं एवमाबभाषे कथितवान् किंकृ
त्वा प्रहस्य प्रहासं कृत्वा किंभूतः रघुः तुरगस्य रक्षिता अश्वपालयिता भो इंद्र यदि चेत् एषः सर्गः ते तव अध्यवसित
हि शस्त्रं गृहाण भो इंद्र खलु निश्चयेन भवान् त्वं कृती न समर्थो न मम पार्श्वात् अश्वं गृहीतुमित्यर्थः किं कृत्वा रघुं अनि
र्जित्य अजित्वा अनजयित्वा सएवेति ५६ शरासने चापं सशरं बाणयुक्तं करिष्यमाणः कर्त्ता पुनः किंभूतो रघुः वपुःप्र
कर्षेण विडंबितेश्वरः कथंभूतेन वपुःप्रकर्षेण आलीढविशेषशोभिना विडंबितः अनुकृतः ईश्वरो रुद्रो येन सः ।
आलीढं धनुर्द्धराणां स्थानविशेषस्तेन शोभते इति आलीढविशेषशोभी तेन आलीढलक्षणमाह नाभितापूर्व
जंघा च पश्चिमा प्रगुणी भवेत् ।अग्रसमो मध्यकायः स्यात् आलीढस्य तु लक्षणं रघोरिति ५७ गोत्रभित् इंद्रोपि ध
नुषि मार्गणं बाणं समाधत्त योजितवान् किंभूतं बाणं अमोघं सफलं कथंभूतः गोत्रभित् रघोः अवष्टंभमयेन पत्रि
णा हृदि क्षतः किंभूते धनुषि नवांबुदानीकमुहूर्त्तलांछने इंद्रचापतुल्य इत्यर्थः दिलीपेति ५८ आशुगः बाणः
दिलीपसूनोः रघुराज्ञः मनुष्यशोणितं पपौ पिबति स्म किं कृत्वा बृहद्भुजांतरं विस्तीर्णं हृदयं प्रविश्य प्रवेशं कृत्वा किं
भूतः आशुगः भीमासुरशोणितोचितः भीमानां भीषणानां असुराणां शोणितास्वादने उचितः योग्यः यः सः केनेव
कुतूहलेनेव किंभूते मनुष्यशोणितं अनास्वादितपूर्वं भुजयोः अंतरं भुजांतरं बृहत् च तत् भुजांतरं च बृहद्भुजांतरं

नतः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हरेः इति ५९ कुमारोपि रघुरपि स्वनामचिह्नं सायकं स्वनामांकितं वाणं हरेः इंद्रस्य भुजे बाहौ निचखान निखा
तवान् कीदृशः कुमारः कुमारविक्रमः कुमारः कार्त्तिकेयः तद्वद्विक्रमो बलं यस्य सः कीदृशे भुजे सुरद्विपास्फा
४ लनकर्कशांगुलौ सुरद्विपस्य ऐरावतस्य आस्फालनेन ताडनेन कर्कशाः कठिनाः अंगुलयो यस्य सः तस्मिन् पुनः किं
भूते भुजे शचीपत्रविशेषकांकिते शच्याः इंद्राण्याः पत्रलतायाः विशेषकेन अंकिते चिह्निते जहारेति ६० रघुर
न्येन द्वितीयेन शरेण शक्रस्य इंद्रस्य महाशनिध्वजं मौलिरूपां पताकां जहार छेदयामास किंभूतेन शरेण मयू
रस्य पत्रं पक्षो यस्यास्तीति मयूरपत्री तेन मयूरपक्षयुतेनेत्यर्थः च पुनः सरोषः कोपि इंद्रोपि भृशं अत्यर्थं तस्मिन् रघौ ब
रघुराहे तु कोपं क्रोधं चक्रे उत्कोन्नता सुरश्रियः देवलक्ष्म्याः प्रसह्य बलात्कारेण केशव्यपरोपणादिव केशछेदना
दिव केशानां कचानां व्यपरोपणं छेदनं केशव्यपरोपणं तस्मात् ध्वजापहारात् किलासीज्जानीते नूतमस्यां स्त्रियाः
एतेन बलात्केशकलापछेदनं वा कारितेन क्रुद्धो कोपशीकः तयोरिति ६१ तयोरिंद्ररघुराज्ञोः परस्परं पत्रिभिर्बाणैः उच्चैर्मुखैः ५
कृतं युद्धं बभूव जातं किंभूतैः बाणैः अधोमुखैः अधोवक्त्रैः पुनः किंभूतैः ऊर्ध्वमुखैः किंभूतं युद्धं तुमुलं व्याकुल
शब्दं पुनः किंभूतं युद्धं उपांते समीपस्थितसिद्धसैनिकं शक्ररघ्वोरुपांते समीपे स्थिताः सिद्धाः देवविशेषास्ते एव सैनि
काः यत्र तत् पुनः किंभूतैः पत्रिभिः गरुत्मदाशीविषभीमदर्शनैः गरुत्मंतः सपक्षा आशीविषाः सर्पास्तद्वत् भीमं भयंक
रं दर्शनं येषां ते गरुत्मदाशीविषभीमदर्शनास्तैः इंद्रस्य गरुडोपमा रघोः सक्तभुजंगमोपेटति किंभूतयोस्तयोः
जयैषिणोः जयं इच्छितुं शीलं ययोस्तौ जयैषिणौ तयोः जयाभिलाषिणोरित्यर्थः अतिरिति ६२ वासवः इंद्रः तं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रघुं निर्वापयितुं शमयितुं न शशाक न समर्थो जातः काभिः अतिप्रबंधप्रहिताभिः वृष्टिभिः अतिप्रबंधेन सातत्येन प्रहितानां प्रे
षितानां अस्त्राणां याः वृष्टयस्ताः अतिप्रबंधप्रहितास्त्रवृष्टयस्ताभिः कः कैः कमिव अंबुदः अद्भिः वह्निमिव किंभूतं व
ह्निं स्वतः च्युतं आत्मनः पतितं यथा अंबुदः अपि तु न समर्थः तथा इंद्रो रघुमपि शमयितुं इंद्रोऽपि न समर्थ इति कथंभूतं रघुं
तेजसः आश्रयं तेजोऽग्निः हि स्पर्धः किंभूतस्य तेजसः दुःप्रसहस्य सोढुमशक्यस्येत्यर्थ इति ६३ ततोनंतरं रघुः पत्रिणा
बाणेन बिडौजसः इंद्रस्य शरासनज्यां धनुःप्रत्यंचां अलुनात् अच्छिनत् किंभूतेन पत्रिणा शशांकार्धमुखेन शशां
कार्द्धवत् मुखं यस्य सः शशांकार्द्धमुखः तेन कस्मात् प्रकोष्ठात् हस्तप्रदेशात् हस्तप्रभावात् किंभूतात् प्रकोष्ठात्
हरिचंदनांकितात् चंदनचिह्नितात् किंभूतां प्रत्यंचां प्रमथ्यमानार्णवधीरनादिनीं प्रमथ्यमानो विलोड्यमानः
यो सौ अर्णवः समुद्रस्तद्वत् गंभीरो नादो यस्याः सा हरिचंदनशब्दोयं कुंकुमे देवभूरुहे रसने कार्थः बिडं भेदकं
ओजो यस्य स बिडौजास्तस्य बिडौजसः स चापेति ६४ स इंद्रः अस्त्रं वज्रं समाददे जग्राह कस्मै प्रबलस्य रघोः
प्रणाशाय किंभूतस्य रघोः विद्विषो वैरिणः किं कृत्वा चापं धनुः उत्सृज्य मुक्त्वा किंभूत इंद्रः विवृद्धमत्सरः वृद्धि
तक्रोधः किंभूतं अस्त्रं महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामंडलं महीध्रपक्षाणां पर्वतपक्षाणां व्यपरोपणे उच्छेदने
उचितं उत्करं स्फुरत्प्रभामंडलं कांतिमंडलं यस्य तत् रघुरिति ६५ रघुसैनिकाक्रोशभिः सेनाचराणां वाक्यैः सह सार्द्धं
भूमौ पृथिव्यां पपात अपतत् किंभूतो रघुः तेन इंद्रमुक्तेन वज्रेण वक्षसि हृदये भृशमत्यर्थं ताडितः पुनः किंभूतो रघुः सै
प्रते निकहर्षनिस्वनैः सैन्यानामानंदशब्दैः सह पुनः उत्थितः किं कृत्वा निमेषमात्रात् क्षणमात्रात् व्यथां तस्य वज्रस्य पीडां
अपवध्य त्यक्त्वा तस्मिन्नुत्थितेऽपि हर्षयामासुरिति तथेति ६६ तथापि इंद्रः विपक्षभावे शत्रुभावे तथापि ... ततो इतस्तवे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२ शस्त्राणां व्यवहारः शस्त्रव्यवहारः शस्त्रव्यवहारे निष्ठुरः हठः शस्त्रव्यवहारनिष्ठुरः तस्मिन् शस्त्रव्यवहारनिष्ठुरे ५२

पित्र्यस्य रघोः तुतोष संतुष्टः केन वीर्यातिशयेन बलाधिक्येन कथं तस्य अस्य चिरं चिरकालं यावत् तस्थुषः स्थितस्येत्यर्थः
किंभूते विपक्षभावे शस्त्रव्यवहारनिष्ठुरे हि यस्मात् शौर्यादिभिर्गुणैः कृत्वा सर्वत्र मित्रशत्रुष्वपि पदं स्थाने निधी
9
यते प्राप्यते अतः सौर्यगुणा तुष्टः इन्द्रः रघुं प्रतीत्यर्थः असङ्ग्येति ६७ वासवः इन्द्रः तं रघुं प्रति इति आह उवाच रतीति किं भो
रघो तुरंगमाहते अश्वं विना त्वं वरं वृणीष्व असंग्रहाल भो कुमार अद्रिषु पर्वतेषु अपि सावचत्तया सबलत्वेन मे मम
युधं वज्रं त्वदन्येन त्वत्तोपरेण विसोढुं असत्यं असह्नीयं अतः भो रघो मा प्रीतिप्रसन्नो अवेहि जानीहि पर्वता अपि ममायु
धं न सहंतीति त्वं तु सोढुं उद्यतः अतः संतुष्ट इति भावः ततोऽइति ६८ ततोऽनंतरं नरेन्द्रसूनुः रघुः सुप्रेश्वरं इन्द्रं प्रति अवदत् कथयामा
स किंभूतः रघुः समधुरवाक् किं कुर्वन् निषंगात् तूणीरात् अर्धं बाणं प्रतिसंहरन् पुनः पश्चात् तूणीरे एव क्षेपयन्नित्यर्थः किंभूतं र
घुं असमग्रनिसृतं तं असंपूर्णं बहिरागतं पुनः किंभूतं बाणं सुवर्णपुंखद्युतिरंजितांगुलिं सुवर्णस्य पुंखः शरमूलं तस्य द्युतिः
दीप्तिः तया रंजिता अंगुलयो येन सः सुवर्णपुंखद्युतिरंजितांगुलिः तं सुवर्णपुंखद्युतिरंजितांगुलिं नरेन्द्रस्य दिलीपस्य
सूनुः पुत्रो नरेन्द्रसूनुः अमोच्यमिति ६९ मोच्य भो यदि अश्वं तुरंगमं अमोच्यं अत्याज्यं मन्यसे तत् तर्हि मम गुरुः दिलीपः
क्रतोर्यज्ञस्य अशेषेण फलेन युज्यतां संबध्यतां यज्ञस्य फलं संपूर्णं भवतीत्यर्थः किंभूतस्य यज्ञस्य अजस्रदीक्षाप्रयत
स्य अजस्रं निरंतरया यज्ञदीक्षया तत्र प्रयतः निरतः अजस्रदीक्षाप्रयतः तस्य अजस्रदीक्षाप्रयतस्य कस्मिन् विषये यथा वि
धिना वेदोक्तप्रकारेण समाप्ते संपूर्णे कर्मणि अशेषफलेन युज्यते तत्तथा चेति ७० भो देवेश इन्द्र विशांपतिर्दिलीपः य
था मे वृत्तांतं शृणोति तथा विधीयतां क्रियतां कस्मात् तत्रैव संदेशहरात् तव दूत पार्श्वतः पुनः इन्द्रो वक्ति भो रघो मद्दू
तमुखात् इमं वृत्तांतं न विज्ञापयिष्यामि नैव दूतः कथयतु कथमिताहं पुनः किंभूतो दिलीपः सदोगतः सभामध्यस्थितः पुनः किंभूतः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निष्ठ

दिलीपः दुरासदः दुःप्रापः दुःखेनाप्यासाद्यते उपगम्यते इति दुरासदः कया त्रिलोचनैकांशतया त्रिलोचनस्य महादेवस्य ए
कांशता त्रिलोचनैकांशता तया त्रिलोचनैकांशतया राज्ञः देहो लोकपालांशैः विनिर्मित इत्यागमः भो रघो उदग्रतरते
जोयुतस्य दिलीपस्य पुरस्ततः मया तुरंगापहारकेन यातुं न शक्यत इत्यर्थः तपेति ७० इंद्रः रघोः कामं अभिलाषं म
नोभीष्टं प्रतितपेतित याचस्व इति सुक्तवान् अंगीकृतवान् मातलिः सारथिः इंद्रः यथागतं तथाययौ गतः येन मार्गेणा
गतः तेनैवागच्छत् इत्यर्थः सुदक्षिणासूनुरपि सुदक्षिणासुतोपि नृपस्य दिलीपस्य सदो गृहं सभागृहं उपन्यव
र्तत समागतः इत्यर्थः किंभूतः राज्ञी सु~~दक्षिणासुतोपि नृपस्य दिलीपस्य सदो गृहं सभागृहं उपन्यवर्त~~तः नातिप्रमना
नः अतिशयेन प्रमना हर्षयुतः मनो यस्य सः नातिप्रमना नातिहर्षमना अश्वलाभाभावादित्यर्थः तमभ्येति ७१ प्रजेश्वरः
दिलीपः तं रघुं अभ्यनन्दत् स्तौति स्म किंभूतो दिलीपः हरेरिंद्रस्य शासनहारिणा आज्ञापालकेन दूतेन प्रबोधि
तः आदावेव ज्ञापितः दिलीपः किं कुर्वन् पाणिना हस्तेन तदीयमंगं रघोरंगं परामृशन् स्पृशन् किंभूतेन पाणिना हर्ष
चलेन हर्षप्रेरितेन कथंभूतं अंगं कुलिशव्रणांकितं कुलिशस्य वज्रस्य व्रणेन घातेन अंकितं चिह्नितं यत्र तत् कुलि
शव्रणांकितं हरिः इंद्रो हरिर्भानुरित्यनेकार्थः इतीति ७२ इति क्षितीशो दिलीपः महाक्रतूनां महायज्ञानां नवतिं ९० ता
न चक्रे किंभूतां नवतिं नवाधिकां नवभिः अधिकां नवाधिकां मर्यादितां एकोनशतमित्यर्थः दिलीपः किं कर्तुमिच्छुः आ
युषः क्षये आयुषः अंते दिवं स्वर्गं आरुरुक्षुः आरोढुमिच्छुः उत्प्रेक्षते क्रतूनां नवाधिकां नवतिं सोपानपरंपरामिव सोपा
नानां परंपरां पंक्तिमिव यथा सोपानैः कृत्वा उच्चैर्यान्ति तद्वद् यज्ञैः स्वर्गं गतः किंभूतो दिलीपः महनीयशासनः महनीयं शास

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नमाज्ञा यस्य सः महनीयशासनः अथेचेति ॥ अत्र अथ अथानंतरं स दिलीपः मुनिवनतरुच्छायां शिश्रिये आश्रितः क
यातया सुदक्षिणया देव्या राज्ञा सह किंभूतो दिलीपः विषयव्यावृत्तात्मा विषयेभ्यः रूपरसगंधादिभ्यः व्यावृत्तः निवृत्तः (
आत्मा यस्य सः किंकृत्वा यथाविधि वेदोक्तप्रकारेण यूने युवराजाय सूनवे पुत्राय सितातपवारणं श्वेतछत्रं दत्वा किंभूतं छ
त्रं नृपतिककुदं नृपतीनां राज्ञां ककुदं चिह्नं यत् तत् नृपतिककुदं हि यतः इक्ष्वाकूणां इक्ष्वाकुवंशोत्पन्नानां नृपाणां इदं कु
लव्रतं कुलाचारः किंभूतानां इक्ष्वाकूणां गलितवयसां गलितं वयो येषां ते गलितवयसः तेषां गलितवयसां गतयौवना
नामित्यर्थः मुनीनां तापसानां वरतरवः तेषां छाया मुनिवरतरुच्छाया तां ॥ हरिणीवृत्तं ॥७५॥ इति श्री रघुवंशे महाकाव्ये का
[illegible] तेसुमतिविजयविरचितायां सुगमार्थबोधिकायां तृतीयसर्गः ॥३॥ [illegible] श्रीरामरामरामरामरामरामराम

मुनिवरतरवः ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative